# केन किं वर्धते?

सुवचनेन मैत्री,
श्रृङ्गारेण रागः,
दानेन कीर्तिः,
सत्येन धर्मः
सदाचारेण विश्वासः,
न्यायेन राज्यम्
औदार्येण प्रभुत्वम्,
पूर्ववायुना जलदः,
पुत्रदर्शनेन हर्षः,
दुर्वचनेन कलहः
नीचसङ्गेन दुश्शीलता,
कुटुम्बकलहेन दुःखम्
अशौचेन दारिद्र्यम्,
असन्तोषेण तृष्णा,

इन्दुदर्शनेन समुद्रः।
विनयेन गुणः।
उद्यमेन श्रीः।
पालनेन उद्यानम्।
अभ्यासेन विद्या।
औचित्येन महत्वम्।
क्षमया तपः।
लाभेन लोभः।
मित्रदर्शनेन आह्लादः।
तृणैः वैश्वानरः।
उपेक्षया रिपुः।
दुष्टहृदयेन दुर्गतिः।
अपथ्येन रोगः।
व्यसनेन विषयः।

Scanned by TapScanner

# अन्तरिक्ष-यात्रा

यावदेव अहं तं लोकम् उपागच्छं मया अनुभूतं यत् तत्र प्रभातकालो जातः। तत्रासीत् आलोकः, परं कुतः आगत इति न अज्ञायत, न तत्र सूर्यस्य दर्शनं जातं न चन्द्रस्य। तत्र पवनो अवहत् किन्तु वनस्पतीनां सर्वथाभावः आसीत्। न क़ोऽपि वृक्षः न वा कापि लता आसीत् तत्र। तत्र प्राणिनः अपि नासन्। मदीयं राकेटयानं शनैः शनैः तत्र अवातरत्। अहं स्वमित्रैः सह यानात् बहिः निष्क्रम्य एकेन लघुयानेन मार्गो पर्यटम् सत्वरमेव एवं मनोहरं नगरं समक्षम् आपतितम्।

यद्यपि याने मया बहु अशितं तथापि तत्र भ्रमणेन अहं क्षुधया पीडितः। तदर्थं मया काश्चित् गुलिकाः अशिताः। पर्यटने मया सुविस्तृताः शोभनाश्च मार्गाः दृष्टाः, मार्गम् उभयतः गगनचुम्बिन्यः अट्टालिकाः परिलक्षिताः। ताः सर्वाः नवनिर्मिताः इव प्रत्यभासन्त। यदा यदा वयं तस्य नगरस्य द्वारम् उपागताः तस्य सुविशालौ द्वावपि कपाटौ अनावृत्तौ सञ्जातौ। एवम् उपलक्षितं यत् कोऽपि अस्मान् प्रतीक्षमाणः अतिष्ठत्। तत्र यातायातस्य कृते न किमपि साधनम् आसीत्। अहम् अचिन्तयं यदत्रत्याः सर्वे नगरवासिनः क्वापि गताः। अन्ततः अहम् एकं गृहमविशम्।

Scanned by TapScanner

तत्रासीत् एकः महान् कक्षः यस्मिन् द्वारं समुन्नतम् आसीत्। तत्रापि कपाटौ स्वचालितौ अनावृत्तौ च अभवताम्। तस्मिन् विस्तीर्णे भवने स्वयं चालितः चित्रपटकार्यक्रमः प्रचलन् आसीत्। एको मन्दो ध्वनिः अश्रूयत्। तस्मिन् तस्य लोकस्य कथा एवं वर्णिता—कदाचित् अत्रापि मानवानां सभ्यः समाजः आसीत्। स समाजः बहुसमुन्नतः अतिष्ठत्। तेन महती वैज्ञानिकी प्रगतिः समुपलब्धा। तस्य समाजस्य सर्वाणि कार्याणि स्वचालितानि अभूवन्, किन्तु कष्टं यत् जनबाहुल्येन पोषणाय भोजनं नैव अवाप्तम्। अन्ततः भोजनं बिना सकलः समाजः सुप्तः अभवत्। इमानि यन्त्राणि अत्र केवलम् इदं विज्ञापयितुं प्रचलन्ति यद् अन्यस्य कस्यचित् लोकस्य मानवः इदं तथ्यं जानीयात्, अस्माकं सन्देशश्च गृह्णीयात्। अचिरमेव इदं सर्वं स्वयमेव विनङ्क्ष्यति।'' एवं विज्ञाप्य सः ध्वनिः सहसा विरतः, तत्र कोऽपि महान् घर्घरनादः च उत्थितः। अहमपि भूमौ अपतम्। तदा मया ज्ञातं यद् अहम् एकं विचित्रं स्वप्नम् अपश्यम्। अहं वारं वारम् अचिन्तयं यदि वयमपि अन्नोत्पादने रक्षणे च सावधाना न भवेम तर्हि अस्माकं पृथिवीलोकः अपि तथैव संकटापन्नः भविष्यति।

Scanned by TapScanner

# भारतीया संस्कृतिः

मानव-जीवनस्य संस्करणं संस्कृतिः। अस्माकं पूर्वजाः मानवजीवनं संस्कर्तुं महान्तं प्रयत्नम् अकुर्वन्। ते अस्माकं जीवनस्य संस्करणाय यान् आचारान् विचारान् च अदर्शयन् तत् सर्वम् अस्माकं संस्कृतिः।

'विश्वस्य स्रष्टा ईश्वरः एक एव' इति भारतीय-संस्कृतेः मूलम्। विभिन्नमतावलम्बिनः विविधैः नामभिः एकम् एव ईश्वरं भजन्ते। अग्निः, इन्द्रः, कृष्णः, करीमः, रामः, रहीमः, जिनः, बुद्धः, ख्रिस्तः, अल्लाहः इत्यादीनि नामानि एकस्य एव परमात्मनः सन्ति। तम् एव ईश्वरं जनाः गुरुः इत्यपि मन्यन्ते। अतः सर्वेषां मतानां समभावः सम्मानश्च अस्माकं संस्कृतेः सन्देशः।

भारतीया संस्कृतिः तु सर्वेषां मतावलम्बिनां संगमस्थली। काले काले विविधाः विचाराः भारतीय-संस्कृतौ समाहिताः। एषा संस्कृतिः सामासिकी संस्कृतिः यस्याः विकासे विविधानां जातीनां सम्प्रदायानां विश्वासानाञ्च योगदानं दृश्यते। अतएव अस्माकं भारतीयानाम् एका संस्कृति एका च राष्ट्रीयता। सर्वेऽपि वयं एकस्याः संस्कृतेः समुपासकाः, एकस्य राष्ट्रस्य च राष्ट्रियाः। यथा भ्रातरः परस्परं मिलित्वा सहयोगेन सौहार्देन च परिवारस्य उन्नतिं कुर्वन्ति, तथैव अस्माभिः अपि सहयोगेन सौहार्देन च राष्ट्रस्य उन्नतिः कर्त्तव्या।

Scanned by TapScanner

अस्माकं संस्कृतिः सदा गतिशीला वर्तते। मानवजीवनं संस्कर्तुम् एषा यथासमयं नवां नवां विचारधारां स्वीकरोति, नवां शक्तिं च प्राप्नोति। अत्र दुराग्रहः नास्ति, यत् युक्तियुक्तं कल्याणकारि च तदत्र सहर्षं गृहीतं भवति। एतस्याः गतिशीलतायाः रहस्यं मानव-जीवनस्य शाश्वतमूल्येषु निहितम्, तद् यथा सत्यस्य प्रतिष्ठा, सर्वभूतेषु समभावः विचारेषु औदार्यम्, आचारे दृढ़ता चेति।

एषा कर्मवीराणां संस्कृतिः। ''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'' इति अस्याः उद्घोषः। पूर्वं कर्म, तदनन्तरं फलम् इति अस्माकं संस्कृतेः नियमः। इदानीं यदा वयं राष्ट्रस्य नवनिर्माणे संलग्नाः स्मः निरन्तरं कर्मकरणम् अस्माकं मुख्यं कर्त्तव्यम्। निजस्य श्रमस्य फलं भोग्यं, अन्यस्य श्रमस्य शोषणं सर्वथा वर्जनीयम्। यदि वयं विपरीतम् आचरामः तदा न वयं सत्यं भारतीय—संस्कृतेः उपासकाः। वयं तदैव यथार्थ भारतीयाः यदा अस्माकम् आचारे विचारे च अस्माकं संस्कृतिः लक्षिता भवेत्। अभिलषामः वयं यत् विश्वस्य अभ्युदयाय भारतीय संस्कृतेः एषः दिव्यः सन्देशः लोके सर्वत्र प्रसरेत्।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

Scanned by TapScanner

# जीवन-सूत्राणि

किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्?
किंस्वित् शीघ्रतरं वातात् किंस्विद् बहुतरं तृणात्?॥१॥

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
मनः शीघ्रतरं वातात्चिन्ता बहुतरी तृणात्॥२॥

किंस्वित् प्रवसतो मित्रंकिंस्विन् मित्रं गृहे सतः?
आतुरस्य च किं मित्रं किंस्विन् मित्रं मरिष्यतः?॥३॥

Scanned by TapScanner

सार्थः प्रवसतो मित्रंभार्या मित्रं गृहे सतः।
आतुरस्य भिषक् मित्रं दानं मित्रं मरिष्यतः।।४।।

किंस्विदेकपदं धर्म्यं किंस्विदेकपदं यशः?
किंस्विदेकपदं स्वर्ग्यं किंस्विदेकपदं सुखम्।।५।।

दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम्।।६।।

धान्यानामुत्तमं किंस्विद् धनानां स्यात् किमुत्तमम्।
लाभानामुत्तमं किं स्यात् सुखानां स्यात् किमुत्तमम्।।७।।

Scanned by TapScanner

धान्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम्।
लाभानां श्रेय आरोग्यं सुखानां तुष्टिरुत्तमा।।८।।

किं नु हित्वा प्रियो भवति? किन्नु हित्वा न शोचति।
किं नु हित्वार्थवान् भवति? किन्नु हित्वा सुखी भवेत्।।९।।

मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति।
कामं हित्वार्थवान् भवति लोभं हित्वा सुखी भवेत्।।१०।।

Scanned by TapScanner